CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

S.D.P.13.

Coll. No. 459.

Title Kaśikāvṛtti

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 459. Subject: Grammar

Title: Kāsikāvritti

Author: Vaman & Jayāditya Scribe: —

Date of the work: — Date of the Ms.: —

Place of the work: — Place of the Ms.: —

Size: 9.1" by 4.2" Extent: 96 to 99.

Language: Sanskrit Script: Devanāgari

Remarks: Incomplete

याजकः। ब्राह्मणयाजकः। याजक। पूजक। परिचारक। परिवेषक। अध्यापक। उत्सादक। उद्वर्तक। होतृ।
भर्तृ। हर्तृ। कर्तृ। रथगणक। पत्तिगणक। तत्स्थैश्च गुणैः षष्ठी समस्यत इति वक्तव्यं। चंदनस्य गंधः। चंदन
गंधः। कपित्थरसः। न तु तद्विशेषणैः। घृतस्य तीव्रो गंधः। चंदनस्य मृदुर्गंधः। गुणात्तरेण तरलोपश्चेति वक्त
व्यं। सर्वेषां श्वेततरः। सर्वश्वेतः। एवं सर्वेषां महत्तरः सर्वमहान्। निर्धारणे प्रतिषेधे प्राप्ते सर्वश्वेतः कागोः॥ ॥
न निर्धारणे। १०। पूर्वेण समासे प्राप्ते प्रतिषेधोऽयमारभ्यते। निर्धारणे या षष्ठी सा न समस्यते। जातिगुण
क्रियाभिः समुदायादेकदेशस्य पृथक्करणं निर्धारणं। क्षत्रियो मनुष्याणां शूरतमः। कृष्णा गवां संपन्नक्षी
रतमा। धावत्त्वध्वगानां शीघ्रतमः। प्रतिपदविधाना च षष्ठी न समस्यत इति वक्तव्यं। सर्पिषो ज्ञानं। मधुनो ज्ञा
नं। ज्ञो विदर्थस्य करणे इति षष्ठी॥ ॥पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन।११।
पूरण। गुण। सुहितार्थ। सत्। अव्यय। तव्य। समानाधिकरण। इत्येतैः सह षष्ठी न समस्यते। अर्थग्रहः
प्रत्येकमभिसंबध्यते। तेन स्वरूपविधिर्न भवति। पूरणार्थे छात्राणां पंचमः। गुण। बलाकायाः शौक्ल्यं।

काकस्य कार्ष्ण्यं। सुहितार्थास्तृप्त्यर्थाः। फलानां सुहितः। फलानां तृप्तः। सत। शतृशानचौ सत्संज्ञौ भवतः
ब्राह्मणस्य कुर्वन्। ब्राह्मणस्य कुर्वाणः। अव्यय। ब्राह्मणस्य कृत्वा। ब्राह्मणस्य हृत्वा। तव्य। ब्राह्मणस्य
कर्तव्यं। तव्यता सानुबंधकेन समासो भवत्येव। ब्राह्मणकर्तव्यमिति। समानाधिकरणे। शुकस्य माराविदस्य।
राज्ञः पाटलिपुत्रकस्य। पाणिनेः सूत्रकारस्य। किं च स्यात्। पूर्वनिपातस्यानियमः स्यात्। अनंतरा
यां तु प्राप्तौ प्रतिषिद्धायां विशेषणं विशेष्येणेति भवत्येव समासः। पूर्वनिपातश्च तदा नियोगतो विशे
षणस्यैव॥ ॥क्तेन च पूजायां॥१२॥ मतिबुद्धिपूजार्थेभ्यश्चेति यः क्तो विहितस्तस्येदं ग्रहणं। पूजाग्र
हणं तूपलक्षणार्थं। क्तो यः पूजायां विहितस्तेन षष्ठी समस्यते। राज्ञां मतः। राज्ञां बुद्धः। राज्ञां पूजितः।
पूजायां किम्। छात्रहसितं॥ ॥अधिकरणवाचिना च॥१३॥ क्तोऽधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थे
भ्य इति वक्ष्यति तस्येदं ग्रहणं। अधिकरणवाचिना क्तेन सह षष्ठी न समस्यते। इदमेषामासितम्।
इदमेषां यातम्। इदमेषां भुक्तं॥ ॥कर्मणि च॥१४॥ क्तेनेति निवृत्तं। कर्मग्रहणं षष्ठीविशेषणं। ३

कर्मणि च या षष्ठी सा न समस्यते। उभयप्राप्तौ कर्मणीति तस्याः षष्ठ्या इदं ग्रहणं। आश्चर्यो गवां दोहो शि
क्षितेन गोपालकेन। रोचते मे ओदनस्य भोजनं देवदत्तेन। साधु खलु पयसः पानं देवदत्तेन। विचित्रा हि सू
त्रस्य कृतिः पाणिनिना॥ ॥तृजकाभ्यां कर्तरि॥१५॥ कर्तृग्रहणं षष्ठीविसा तृचाकेन च न समस्यते।
भवतः आसिका। भवतः शायिका। भवतोग्रगासिका। तृच् कर्तर्येव विधीयते। तत्प्रयोगे कर्तरि षष्ठी
नास्तीति तस्मात् तृचग्रहणमुत्तरार्थं। कर्तृग्रहणमितरत्र व्यभिचाराभावात्। कर्तरीति किम्। इक्षुभक्षि
कां मे धारयसि॥ ॥कर्तरि च॥१६॥ कर्तरि यौ तृजकौ ताभ्यां सह षष्ठी न समस्यते। सामर्थ्यादकस्य वि
शेषणमिदम्। कर्तृग्रहणमितरत्र व्यभिचाराभावात्। अपां स्रष्टा। पुरां भेत्ता। वज्रस्य भर्ता। ननु च भर्तृश
ब्दोऽयं याजकादिषु पठ्यते। संबंधिशब्दस्य पतिपर्यायस्य तत्र ग्रहणं। अकेन खल्वपि। ओदनस्य भोजकः।
सक्तूनां पायकः॥ ॥नित्यं क्रीडाजीविकयोः॥१७॥ नेति निवृत्तं। नित्यं समासो विधीयते। क्रीडायां जीविकायां
च नित्यं षष्ठी समस्यते। तत्पुरुषश्च समासो भवति। तत्र क्रीडाजीविकयोर्नास्तीति अक एवोदाह्रियते।

उद्दालकपुष्पभंजिका। वारणपुष्पप्रचायिका। अभावे। विकायां। दंतलेखकः। क्रीडाजीविकयोरिति किं। ओद-
नस्य भोजकः। कुगतिप्रादयः॥ १८॥ नित्यमिति वर्त्तते। कुशब्दोऽव्ययं गृह्यते। गत्यादिभिः साहचर्यात्। तद्-
व्यवचनः। कुगतिप्रादयः समर्थेन पदांतरेण सह नित्यं समस्यंते। तत्पुरुषश्च समासो भवति। कुपापार्थे
कुपुरुषः। गति। उरीकृत्य। उररीकृत्य। यदुरीकरोति। प्रादयः। दुर्निंद्यायां। दुःपुरुषः। स्वती पूजायां। सुपु-
रुषः। अतिपुरुषः। आङीषदर्थे। आपिंगलः। प्रायिकं चैतदुपाधिवचनं। अन्यत्रापि हि समासो भवति
दृश्यते। कोष्णं। कदुष्णं। दुःकृतं। सुकृतं। अतिस्तुतं। आबद्धमिति। प्रादयो गताद्यर्थे प्रथमया। प्रगत आचा-
र्यः प्राचार्यः। प्रांतेवासी॥ अत्यादयः क्रांताद्यर्थे द्वितीयया। अतिक्रांतः खट्वामतिखट्वः। अतिमालः। अवाद-
यः क्रुष्टाद्यर्थे तृतीयया। अवक्रुष्टः कोकिलया। अवकोकिलो वसंतः। पर्यादयो ग्लानाद्यर्थे चतुर्थ्या। परि-
ग्लानोऽध्ययनाय पर्यध्ययनः। अलंकुमार्यै अलंकुमारिः॥ ॥निरादयः॥ ॥क्रांताद्यर्थे पंचम्या॥ निः
क्रांतः कौशांब्याः निष्कौशांबिः। निर्वाराणसिः। इवेन विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं च वक्तव्यं। ४

वाससी इव। वस्त्रे इव। प्रादिप्रसंगे कर्मप्रवचनीयानां प्रतिषेधो वक्तव्यः। वृक्षं प्रति विद्योतते वि-
द्युत्। साधुर्देवदत्तो मातरं प्रति॥ ॥उपपदमतिङ्॥ १९॥ नित्यमिति वर्त्तते। उपपदमतिङंतं समर्थेन शब्दां-
तरेण सह नित्यं समस्यते। तत्पुरुषश्च समासो भवति। कुंभकारः। नगरकारः। अतिङिति किं। एधाना-
हारको व्रजति। ननु च सुप्सुपेति वर्त्तते। तत्र कुतस्तिङ्प्रसंगः। एवं तर्हि ज्ञापयति। एतयोर्योगयोः सु-
प्सुपेति न संबध्यत इति। तेन गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेरिति तदु-
पपन्नं भवति। व्याघ्री। अश्वक्रीती। धनक्रीता। कच्छपी॥ ॥अमैवाव्ययेन॥ २०॥ पूर्वेणैव समासे सिद्धे
नियमार्थमिदं वचनं। अव्ययेनोपपदस्य यः समासः सोऽमैव भवति। नान्येन। स्वादुंकारं भुंक्ते। संपन्नं-
कारं भुंक्ते। लवणंकारं भुंक्ते। अमैवेति किं। कालसमयवेलासु तुमुन्। कालो भोक्तुं। वेला भोक्तुं। एवका-
रकरणमुपपदविशेषणार्थं। अमैव यत्तुल्यविधानमुपपदं तेन सह समासो यथा स्यात्। अमा चान्ये-
न च यत्तुल्यविधानं तस्य मा भूत्। अग्रे भुक्त्वा। अग्रे भोजं॥ ॥तृतीयाप्रभृतीन्यन्यतरस्यां॥ २१॥

अमैवेत्यनुवर्त्तते। उपदंशस्तृतीयायामित्येतत्प्रभृतीनि यान्युपपदानि तान्यमैवाव्ययेन सहान्यतरस्यां
समस्यंते। तत्पुरुषश्च समासो भवति। उभयत्र विभाषेयं। यदमैव तुल्यविधानमुपपदं तस्य प्राप्ते य
थोपदंशस्तृतीयायामिति। यत्त्वन्यमाव्ययेन तुल्यविधानं तस्याप्राप्ते। यथाव्ययेऽयथाभिप्रेताख्या
ने कृञः क्त्वाणमुलाविति। मूलकोपदंशं भुंक्ते। मूलकेनोपदंशं भुंक्ते। उच्चैःकारमाचष्टे। उच्चैःकारं।
अमैवेत्येव। पर्याप्तिवचनेष्वलमर्थेषु। पर्याप्तो भोक्तुं॥ ॥क्त्वा च॥२२॥ अमैवेति निवृत्तं योगेनुवृत्तं तेनान्यत्र
सर्वेण न प्राप्नोतीति वचनमिदमारभ्यते। क्त्वाप्रत्ययेन च तृतीयाप्रभृतीन्युपपदान्यन्यतरस्यां समस्यंते।
तत्पुरुषश्च समासो भवति। उच्चैःकृत्य। उच्चैः कृत्वा। अव्ययेऽयथाभिप्रेताख्यान इति क्त्वाप्रत्ययः। समास
पक्षे ल्यप्। तृतीयाप्रभृतीनीत्येव। अलं कृत्वा। खलु कृत्वा॥ ॥शेषो बहुव्रीहिः॥२३॥ उपयुक्तादन्यः शेषः।
शेषः समासो बहुव्रीहिसंज्ञो भवति। कश्च शेषः। यत्रान्यः समासो नोक्तः। वक्ष्यति। अनेकमन्यपदार्थ इ
ति। चित्रगुः। शबलगुः। समोत्तरासंगः। शेष इति किम्। उन्मत्तगंगं। लोहितगंगं। बहुव्रीहिप्रदेशाः॥ ५

न बहुव्रीहावित्येवमादयः॥ ॥अनेकमन्यपदार्थे॥२४॥ अनेकं सुबंतमन्यस्य पदस्यार्थे वर्त्तमानं
समस्यते। बहुव्रीहिसंज्ञकश्च समासो भवति। प्रथमार्थं वर्ज्जयित्वा सर्वेषु विभक्त्यर्थेषु बहुव्रीहि
र्भवति। प्राप्तमुदकं यं ग्रामं प्राप्तोदको ग्रामः। ऊढरथोऽनड्वान्। उपहृतपशू रुद्रः। उद्धृतौदना स्था
ली। चित्रगुर्देवदत्तः। वीरपुरुषो ग्रामः। प्रथमार्थे तु न भवति। वृष्टे देवे गतः। अनेकग्रहणं किम्। बहू
नामपि यथा स्यात्। सुसूक्ष्मजटकेशेन सुनताजिनवाससा। समंतशितिरंध्रेण द्वयोर्वृत्तौ न सिध्यति
बहुव्रीहिः समानाधिकरणानामिति वक्तव्यं। व्यधिकरणानां मा भूत्। पंचभिर्भुक्तमस्य। अव्ययानां च।
उच्चैर्मुखः। नीचैर्मुखः। सप्तम्युपमानपूर्वपदस्योत्तरपदलोपश्च। कंठेस्थितः कालोऽस्य कंठेकालः।
उरसिलोमा। उष्ट्रमुखमिव मुखमस्योष्ट्रमुखः। खरमुखः। समुदायविकारषष्ठ्याश्च बहुव्रीहे
रुत्तरपदलोपश्चेति वक्तव्यम्। केशानां समाहारश्चूडा अस्य केशचूडः। सुवर्णविकारोऽलंकारोऽस्य
सुवर्णालंकारः। प्रादिभ्यो धातुजस्य वा बहुव्रीहिर्वक्तव्यः। उत्तरपदलोपश्च। प्रपतितं पर्णमस्य प्रप

पर्णः प्रपतितपर्णः। प्रपलाशः प्रपतितपलाशः॥ नञोऽस्त्यर्थानाम्। बहुव्रीहिर्वा चोत्तरपदलोपश्च
अविद्यमानः पुत्रोऽस्य अपुत्रः। अविद्यमानः पुत्रः। अविद्यमाना भार्यास्य अभार्यः। अविद्यमाना भार्या
सुबधिकारेऽस्तिक्षीरादिवचनं। अस्तिक्षीरा ब्राह्मणी॥ ॥संख्ययाव्ययासन्नादूराधिकसंख्याः संख्ये
ये॥२५॥ संख्येये या संख्या वर्त्तते। तया सह अव्यय। आसन्न। अदूर। अधिक। संख्या। इत्येते समस्यन्ते बहु
व्रीहिश्च समासो भवति। अव्यय। उपदशाः। उपविंशाः। आसन्न। आसन्नदशाः। आसन्नत्रिंशाः। अदू
र। अदूरदशाः। अदूरविंशाः। अदूरत्रिंशाः। अधिक। अधिकविंशाः। अधिकत्रिंशाः। संख्या। द्वित्राः।
त्रिचतुराः। द्विदशाः। त्रिदशाः। संख्ययेति किम्। पंचब्राह्मणाः। अव्ययासन्नादूराधिकसंख्या इति
किम्। ब्राह्मणाः पंच। संख्येय इति किम्। अधिका विंशतिर्गवां॥ ॥दिङ्नामान्यन्तराले॥२६॥ दिशां नाम
नि सुबंतान्यंतराले वाच्ये समस्यंते। बहुव्रीहिश्च समासो भवति। दक्षिणस्याश्च पूर्वस्याश्च दिशो य
दन्तरालं दक्षिणपूर्वा दिक्। पूर्वोत्तरा। उत्तरपश्चिमा। पश्चिमदक्षिणा। सर्वनाम्नो वृत्तिमात्रे पूर्वप